~~[illegible]~~

नं० ७६६-घ

अभिज्ञानशाकुन्तलम् (संपूर्णम्)

नं० ७५५-घ

पत्राणि ६३

६३ पत्राणि

शकुंतलानाटक प- ६२

शा.

॥श्रीगणेशाय नमः॥ या सृष्टिः स्रष्टुराद्या वहति विधिऊतं या चैं हवि र्या च होत्री ये द्वे का
लं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वं। यामाऊः सर्वबीजप्रकृतिरिति य
या प्राणिनः प्राणवंतः प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः॥१॥
नाद्यन्ते सूत्रधारः॥ नेपथ्याभिमुखमवलोक्य आर्ये यदि नेपथ्यविधानमवसितं इत
स्तावदागम्यतां प्रविश्य नटी अज्ज उत्त इअम्हि आणवेदु को णिओओ अणुचिट्ठी
अदु त्ति सूत्र. आर्य्ये अभिरूपभूयिष्ठा परिषत् अद्य खलु कालिदासग्रथित
वस्तुनाभिज्ञानशाकुंतलेन नाम्ना नवेन नाटकेनोपस्थातव्यमस्माभिः तत्प्र
तिपात्रमाधीयतां यत्नः नटी सुविहिदप्पओअदाए अज्जस्स ण किंवि परिहाइ
स्सदि। सूत्रधारः। आर्य्ये कथयामि ते भूतार्थं। यतः आपरितोषाद्विदुषां न साधु १

मन्ये प्रयोगविज्ञानं । बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः । २ । नटी । एवं ण्णेदं
अनंतरं करणिज्जं दाव अज्जो आणवेदु । सूत्रधारः । किमन्यदस्याः परिषदः श्रुति
प्रसादनतो अनंतरं करणीयमस्ति नटी कदमं उण समयं अधिअरिअ गाइस्सं
सूत्रधारः नन्विममेव तावदचिरप्रवृत्तमुपभोगक्षमं ग्रीष्मसमयमधिकृत्य गीयतां
संप्रति हि सुभगसलिलावगाहाः पाटलसंसर्गिसुरभिवनवाताः प्रच्छायसुलभ
निद्रा दिवसाः परिणामरमणीयाः । नटी तह इति । गायति ईसीसिचुंबिआइं भंव
रेहिं सुउमारकेसरसिहाइं ओदंसअंति दअमाणा पमदाओ शिरीसकुसुमाइं सूत्र
आर्ये साधु गीतं रागबद्धचित्तवृत्तिरालिखित इव सर्वतो लोकः तदिदानीं कत

२ मस्त्वं करणमात्मैकस्येन मारीचधयामसः। नटी ननु। आर्यमिस्त्रेहिं पढमं एवं आणत्तं अहि
ण्णाणसाउंदलं नाम नाडअं अपुव्वं पओए अहिकरीयदु ति। सूत्र। आर्ये सम्यगनुबोधितो
स्मि। अस्मिन्क्षणे विस्मृतं खलु मया कुतः। तवास्मि गीतरागेण हारिणा प्रसभं हृ
तः। एष राजेव दुष्यंतः सारंगेणातिरंहसा ५ इति निष्क्रांतौ प्रस्तावना॥ ततः प्र
विशति मृगयानुसारी सशरचापहस्तो राजा रथेन सूतश्च। सूतः राजानं मृगं
चावलोक्य आयुष्मन् पश्य। कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके। मृगानु
सारिणं साक्षात्पश्यामीव पिनाकिनं। ॥ राजा। सूत दूरममुना सारंगेणवय २
माकृष्टाः। अयं पुनरिदानीमपि। ग्रीवाभंगाभिरामं मुहुरनुपतति स्यंदने बद्धदृ

ष्टिः पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायं। दर्भैरर्द्धावलीढैः श्रमविवृतमु
खभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमूर्व्यां प्रयाति। तदेष
कथमनुपदमेव प्रयत्नप्रेक्षणीयः संवृत्तः। सूतः। आयुष्मन्नुद्घातिनी भूमिरिति म
यारश्मिसंयमनाद्रथस्य मंदीकृतो वेगः। तेन मृग एष विप्रकृष्टान्तरः संवृत्तः संप्रति
समदेशवर्त्तिनस्ते दुरासदो न भविष्यति। राजा। तेन विमुच्यतामभीशवः। सूतः। यदा
ज्ञापयत्यायुष्मान्। रथवेगं निरूप्य। आयुष्मन् पश्य। मुक्तेषु रश्मिषु निरायतपूर्वका
या निष्कंपचामरशिखा निभृतोर्द्ध्वकर्णाः। आत्मोद्धतैरपि रजोभिरलंघनीया धावं
त्यमी मृगजवाक्षमयेव रथ्याः। राजा। सत्यमतीत्य हरितो हरींश्च वर्त्तन्ते हरयः। तथाहि

यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां यदर्द्धे विच्छिन्नं भवति कृतसंधानमिव त
त्। प्रकृत्या यद्वक्रं तदपि समरेखं नयनयोर्न मे पार्श्वे किंचित्क्षणमपि न दूरे रथजवा
त्॥ सूतः। पश्य पश्यैनं व्यापाद्यमानं इति शरसंधानं नाटयति। नेपथ्ये। भो भो राजन्
न्नाश्रममृगोयं न हन्तव्यो न हन्तव्यः। सूतः। आकर्ण्यावलोक्य च। आयुष्मन्नस्य खलु
ते बाणपातवर्त्तिनः कृष्णसारंगस्यान्तरे तपस्विन उपस्थिताः। राजा। तेन हि प्रगृह्यन्तां
वाजिनः। सूतः। तथेति स्थापयति रथं। ततः प्रविशत्यात्मना तृतीयो वैखानसः
। वैखानसः। हस्तमुद्यम्य। राजन्नाश्रममृगोयं न हन्तव्यो न हन्तव्यः न खलु न खलु बा ३
णः सन्निपात्योयमस्मिन्मृदुनि मृगशरीरे पुष्पराशाविवाग्निः। क्व बत हरिणकानां

जीवितं चातिलोलं क्व च निशितनिपाता वज्रसाराः शरास्ते। तत्साधुकृतसंधानं प्रति संहर
सायकं। आर्त्तत्राणाय वः शस्त्रं न प्रहर्त्तुमनागसि।२। राजा। एष प्रतिसंहृत इति यथोक्तं
करोति। वैखानसः। सदृशमेतत्पुरुवंशप्रदीपस्य भवतः। जन्म यस्य पुरोर्वंशे युक्तरूपमि
दं तव। पुत्रमेवंगुणोपेतं चक्रवर्त्तिनमाप्नुहि।१। इतरौ बाहू उद्यम्य चक्रवर्त्तिनं पुत्रमाप्नु
हि। राजा सप्रणामं प्रतिगृहीतं वचनं। वैखानसः। राजन्समिदाहरणाय प्रस्थिता वयं॥
एष खलु कण्वस्य कुलपतेरनुमालिनीतीरमाश्रमो दृश्यते। न चेदन्यकार्यातिपातस्तत्प्र
विश्य गृह्यतामातिथेयः सत्कारः। अपि च। धर्म्यास्तपोधनानां प्रतिहतविघ्नक्रियाः समवलो।
क्य। ज्ञास्यसि कियद्भुजो मे रक्षति मौर्वीकिणाङ्क इति। राजा। अपि सन्निहितोऽत्र कुलपतिः
। वैखानसः। इदानीमेव दुहितरं शकुन्तलामतिथिसत्काराय नियुज्य दैवमस्याः प्रतिकूलं।

शमयितुं सोमतीर्थं गतः। राजा। भवतु सा खलु विदितभक्तिं मां महर्षेः करिष्यति। वैखा
नसः। साधयामस्तावदिति सशिष्यो निष्क्रांतः। राजा। सूत चोदयाश्वान् पुण्याश्रम
दर्शनेन तावदात्मानं पुनीमहे। सूतः। यदाज्ञापयति आयुष्मान्। भूयो रथवेगं
निरूपयति। राजा। समंतादवलोक्य। अकथितोऽपि ज्ञायत एव यथायमाभोगस्तपोव
नस्येति। सूतः। कथमिव। राजा। किं न पश्यति भवान्। इह हि। नीवाराः शुकगर्भकोट
रमुखभ्रष्टास्तरूणामधः प्रस्निग्धाः क्वचिदिंगुदीफलभिदः सूच्यंत एवोपलाः। वि
श्वासोपगमादभिन्नगतयः शब्दं सहंते मृगास्तोयाधारपथाश्च वल्कलशिखानिस्यं
दरेखांकिताः। कुल्यांभोभिः प्रकृतिचपलैः शाखिनो धौतमूला भिन्नो रागः ४ किस ४
लयरुचामाज्यधूमोद्गमेन। १। एते चार्वागुपवनभुवि छिन्नदर्भांकुरायां नष्टाशंका

हरिणाः श्रान्ता इव मंदं मंदं चरंति। सूतः। सर्वमुपपन्नं। राजा। स्तोकमंतरं गत्वा भूत तपोवननि
वासिनामुपरोधो मा भूत् एतावत्येव रथं स्थापय यावदवतरामि। सूतः। धृताः प्रग्रहाः अ
वतरत्वायुष्मान्। राजा। अवतीर्य्य सूत विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम तावद्गृ
ह्यतामिति सूताया भरणानि धनुश्चोपनीय अर्पयति। सूत यावदहमाश्रमवासिनः प्र
त्यावेक्ष्योपावर्त्ते तावदार्द्रपृष्ठाः क्रियंतां वाजिनः। सूतः। तथेति निष्क्रांतः। राजा। परिक्रम्या
वलोक्य च। इदमाश्रमद्वारं यावत्प्रविशामि। प्रविश्य निमित्तं सूचयन् इदमाश्रमपदं स्फुर
ति च बाहुः। कुतः फलमिहास्य। अथवा भवितव्यानां द्वाराणि भवंति सर्वत्र। नेपथ्ये। इदो इदो
सहीयो। राजा। कर्णं दत्वा। अये दक्षिणेन वृक्षवाटिकायामालाप इव श्रूयते यावदत्र गच्छा
मि। परिक्रम्यावलोक्य च। अये एतास्तपस्विकन्याः स्वप्रमाणानुरूपैः सेचनघटैर्बालपाद

5 चेष्टः पयोदानुमितएवाभिवर्त्तते तान्निरूप्य अहोमधुरमासां दर्शनं । तथाहि । शुद्धांत
दुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य । दूरीकृताः खलु गुणैरुद्यानलता वनल
ताभिः । यावदिमां छायामाश्रित्य प्रतिपालयामि विलोकयति । ततः प्रविशति यथो
क्तव्यापारा सह सखीभ्यां शकुंतला । शकुं० । इदो इदो सहीओ । अनसू० । हला सउंद
ले तुवत्तो वि तादकस्सव स्स अस्समरुक्खआ पिअदरेति तक्केमि येण णोमालि
आकुसुमपेलवा तुमं वि दाव एदाणं आलवालपूरणे नियुत्ता । शकुं० । ण केवलं
तादणिओओ ज्जेव अत्थि सोदरसिणेहो वि एदेसु इति वृक्षसेचनं निरूपयति । राजा
। कथमियं सा कण्वदुहिता । असाधुदर्शी खलु तत्रभवान्काश्यपः य इमामाश्रमे ५
धर्मे नियुंक्ते । इदं किलाव्याजमनोहरं वपुः तपःक्षमं साधयितुं य इच्छति । ध्रुवं स

नीलोत्पलपत्रधारयासमिद्लतां छेत्तुमृषिर्व्यवस्यति ।२। भवतु पादपांतरित एव तावदे
नां । पश्यामि । तथा करोति । शकुं० । सहि अणसूये अदिपिणद्धेण वक्कलेण पिअंवदाए
णिअंतिदह्मि सिढिलेहि दाव णं । अनसूया । तह इति शिथिलयति । प्रियंवदा । एत्थ प
ओधरवित्थारइतअं । अत्तणो जोव्वणं उवालहमं किं उवालंभेसि । राजा । काममननुरू
पमस्य वयसो वल्कलं न पुनरलंकारश्रियं पुष्यति यतः सरसिजमनुविद्धं शैवलेना
पि रम्यं मलिनमपि हिमांशोर्लक्ष्मलक्ष्मीं तनोति । इयमधिकमनोज्ञा वल्कलेनापि त
न्वी किमिव हि मधुराणां मंडनं नाकृतीनां ।३। शकुंतला । एसो वादेरिदपल्लवंगुलीहिं तु
वरेदि विअ मं केसररुक्खओ ता वणं संभावेमि । परिक्रामति । शकुं० । यथोक्तं करोति । प्रियं
वदा । हला सउंदले एत्थ दाव मुहुत्तअं चिट्ठ जाव तुए उवगदाए कदासणाहो विअ अअं केस

रसरक्खओ पडिभादि। शकुं०। अहो खु पिअंवदासि तुमं। राजा। प्रियमपि तथ्यमाह। श
कुंतलाप्रियंवदा। अस्याः खलु अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू
।कुसुममिव लोभनीयं यौवनमंगेषु संनद्धं। अन०। हला सउंदले इअं सअंवर
वहू सहआरस्स तुए किदणामधेया वणजोसिणि त्ति णोमालिआ। एं विसुमरदासि
शकुं० तदा अत्ताणं वि विसुमरिस्सं। लतामुपेत्य। अवलोक्य च। अनसूया। हला सउं
दले रमणीये काले इदम सलदापाअवमिहुणस्स वइअरो संवुत्तो णवकुसुम
योव्वणा वणजोसिणी सिणिद्धपल्लवदाए उवभोअक्खमो सहआरो। इति पश्यं
तीतिष्ठति। प्रियंवदा। सहि अणुसूए जाणासि किं सउंदला वणजोसिणिं अदि ६
मेत्तं पेक्खदि त्ति। अन०। ण क्खु विभावेमि। कहेहि। प्रियंवदा। जह वणजोसिणी अणुरू

वेणाआअवेणसंगदाअविणा मए ब्वं अहं विअत्तणो अणुरूववरं लहे अत्ति।शकुं।एसाण
णंतुह अत्तणोगदंमणोरहो।कलषामावर्जेयेति।राजा।अपिनामकुलपतेरियं।अ
सवर्णक्षेत्रसंभवा स्यात्।अथवाकृतंसंदेहेन।असंशयंक्षत्रपरिग्रहक्षमा यदार्यमस्
स्यामभिलाषिमे मनः।सतांहिसंदेहपदेषुवस्तुषुप्रमाणमंतःकरणप्रवृत्तयः॥२॥तत
थापितत्त्वतएनामुपलप्स्ये।शकुं०ससंभ्रमं।अम्मोसलिलसेअसंभमुग्गदोणोमालिअं
उज्झिअवअणंमेमहुअरोअहिवट्टइ।राजा।सस्पृहं।चलापांगांदृष्टिंस्पृशसि बहुशोवे
पथुमतीरहस्याख्यायीवस्वनसिमृदुकर्णांतिकचरः।करंव्याधुन्वंत्याःपिबसिरतिस
र्वस्वमधरंवयंतत्त्वान्वेषान्मधुकरहतास्त्वंखलुकृती।२।शकुंतला।हलापरित्ता अध
रइमिणात्महुअरेणअभिभूयमाणं,उभेसस्मितं।कावअंपरित्तातुंदुष्यंतंआकंदए।

7 अरस्की अह्मा। तिनवोवणो इत्ति। वित अपदोवआरो। राजा। अवसरोयमात्मानं दर्श
यितुं न भेतव्यं न भेतव्यमित्यर्द्धोक्ते सलज्जं नाट्यति। स्वगतं। राजा भावस्तावदभिज्ञातो
भवति भवत्वेवमभिधास्ये। शकुंतला। हला ण एसो धट्ठो विरमदि। अस्सदोसं मि-
त्तपदांतरं गत्वा सदृष्टिक्षेपं। कधं इदोवि मं अणुसरदि। राजा। ब इचरत्नो निव
र्त्तितः स्ततस्ततः प्रेषितलोललोचना निनर्तितभ्रूरियमद्य शिक्षते। वेलादकामा-
पि हि दृष्टिविभ्रमं २२ राजा सवेगमुपसृत्य कः पौरवे वसुमतीं शासति शासितरि दु-
र्विनीतानां। अयमाचरत्यविनयं मुग्धासु तपस्विकन्यकासु। २४। सर्वे राजानं दृष्ट्वा 8
किंचिदिव ससंभ्रांता। अनसूया। अज्ज ण खु किंवि अच्चहिदं। इअं णो पिअसही म-
हुअरेण अभिहूयमाणा कादरीभूता इति। शकुंतलां दर्शयति। राजा। अपित

पोवर्द्धते। शाकुंतला। साध्वसादवचनातिष्ठति। अनसूया। अज्ज दाणीं अदिधिविसेस
लंभेण। प्रियंवदा। सागदं अज्जस्स। अनुसूया। हला सउंदले गच्छ उडजादो पुप्फफला
मिस्सं। अग्घं उवह। पादोदअं भविस्सदि। राजा। भवतीनां सूनृतया गिरा कृतमातिथ्यं
। प्रियंवदा। तेण हि इमस्सिं दाव पच्छायसीदलाए सत्तवण्णवेदिआए उववि सउ अज्जो
परिस्समविणोअं करेदु। राजा। ननु यूयमपि अनेन कर्मणा परिश्रांता मुहूर्त्तमुपविश्य
ता। अनुसूया। हला सउंदले उइदं णो पज्जुवासनं। अदिधीणं। एत्थ उपविसह्म सर्वा
उपविशंति। शाकुं। आत्मगतं। किं खु इमं पेरके पतपोवणविरोहिणो विआरस्स गमणी
यह्मि संवुत्ता। राजा। सर्वाः समवलोक्य समवयोरूपरमणीयं सोहार्दं भवतीनां। प्रियं
वदा जनांतिकं। सहि अणसूये को णु खु एसो चतुरगंभीराकिदी मधुरं पिआलवंतो प

=रस्स

स्व०१ हाववंदे विमरसें रसिय वीअदि। अनसूया। सहि समाविअत्थि कोदुहल्लं पुच्छे
ससं दाव एत्थ। प्रकाशं। अज्जस्स महुरालावेण जणिदो विस्सासो मं मुहरावे।
दि कदमो राएसिवंसो अज्जेण अलंकरीअदि कदमो वा विरहपज्जुस्सुअजणो
किदो देसो किंणिमित्तं वा सुउमारेण अज्जेण तवोवणगमणपरिस्समस्स अ
त्ता उवणीदो। शाकुंतला। आत्मगतं। हिअअ मा उत्तम्म एसा वितुए विदि दाणी
अणसूआ मंतेदि। राजा। आत्मगतं। कथमिदमात्मानमावेदये कथं वात्मोप
हारं करोमि। भवत्वेवं तावदेवं वक्ष्ये। प्रकाशं। पत्योरवेण राज्ञा धर्माधिकरणे ८
नियुक्तः। सोहमाश्रमिणामविघ्नक्रियोपलम्भाय धर्मारण्यमिदमायातः। अ
नसूया। सणाधा धम्मचारिणो। शाकुं०। मणारलज्जं रूपयति। सखी उभयो

राकारं विदित्वा जनांतिकं। हला सउंदले यदित्ता दो संनिहिदो भवेंश कुं ता किं तदो भवेदंस
व्वो। तदो इमं जीवसव्वस्सेन आएस्यग्नदिधिं कदत्थं करेइ। शकुंतला अपनुहे किं हिय
एकरीयमं ते धणवो वअणं सुणिस्सं पराहस्सति इति। राजा वयमपि तावत्किंचित्स
खीगतं भवतीः एच्छामः। सख्यौ। अज्जो अणुग्गहो किं अब्भत्थणा। राजा भगवान्काश्यप
पः शश्वते ब्रह्मणि स्थित इति। प्रकाशं। इयं च वः सखी तदात्मजेति कथमेतत्। अनसू
यां सुणादु अज्जो अत्थि को कोसिओ त्ति नामहेओ महापभावो राएसी। राजा स्तूयते। अ
नसूया। तं सहीए पभवं अवगच्छदु भवं। उज्झिदाए सरीरवद्धणादिहिं तादकस्सवो से पि
ता। राजा। उज्झितसरीरेण पुनर्जनितं मे कुतूहलं। आमूलाच्छ्रोतुमिच्छामि। अनसूया।
सुणादु अज्जो पुरा तस्स राएसिणो उग्गतवसिज्जदमाणस्स किं वि जाद संकेहिं देवेहिं

नियमस्स विप्रकरणाय मेनकानामाप्सराः प्रेषिता। राजा। अस्त्येतदन्यसमा-
8 धिभीरुत्वं देवानां। ततस्ततः। अनसूया। तदा वसंतोदारसमए एदाए उम्मादइत्तय-
रूवं पेक्खिय। इत्यर्धोक्ते लज्जां रूपयति। राजा। भवतु पुरस्तादवगम्यत एव सर्वथाप्-
सरःसंभवैषा। अनसूया। अथ किं। राजा। उपपद्यते। मानुषीषु कथं वा स्यादस्य रू-
पस्य संभवः। न प्रभातरलं ज्योतिरुदेति वसुधातलात्। शकुंतला। अधोमुखी तिष्ठ-
ति। राजा। आत्मगतं। लब्धावकाशो मे मनोरथः। किंतु। सख्योः परिहासोदाहृतां वर-
प्रार्थनामस्याः श्रुत्वा धृतद्वैधीभावकातरं मे मनः। प्रियंवदा। सस्मितं शकुंतलां वि-
लोक्य नायकाभिमुखी भूत्वा पुणोवि वत्तुकामो अज्जो। शकुंतला सखीमंगुल्या ८
तर्जयति। राजा। सम्यगुपलक्षितं भवत्या। अस्ति नः सच्चरितश्रवणलोभादन्यदपि

हहव्वं प्रियंवदा तेण हि अलं विचारियेण अणिज्झातणाणुओ ओखु तवस्सिजणो॥
राजा। भद्रे इति ते सखीं वदितुमिच्छामि वेभ्रान्त संकिमनया व्रतमाप्रदानात् व्यापाररो
धि मदनस्य निषेवितव्यं। अत्यंतमेव सदृशो त्तणवल्लभाभिराहे निवत्स्यति समं हरिणां
गनाभिः॥१६॥ प्रियंवदा। अज्ज धम्मचरणे वि परवसो अअं जणो गुरुणो खु से अणुरूव
वरप्पदाणे संकप्पो। राजा। न दुरावेयं प्रार्थना। स्वगतं। भव हृदय साभिलाषं संप्रति संदे
ह निर्णयो जातः। आशंकसे यदग्निं तदिदं स्पर्शक्षमं रत्नं। शकुंतला। सरोषमिव
सहि अणसूये गमिस्सं अहं। अणसूया। किंणिमित्तं। शकुंतला। असंबद्धप्पलाविणिं
प्रियंवदं। अज्जाए गोदमीए णिवेदयिदुं। अनसूया। सहि ण जुत्तं। अकिदसक्कारं अदि
धिविसेसं उज्झिय अस्सं पवासिणो जणस्स सच्छंददो गमणं। शकुं। न किंचिदुक्त्वे वप्रस्थि

ता। राजा। स्वगतं। कथं गच्छति। गृहीतुमिच्छन्। आत्मानं निगृह्य। अहो चेष्टाप्रतिरूपिका
10 कामिमनोवृत्तेः। अहं हि। अनुयास्यन्मुनितनयां सहसा विनयेन वारितप्रसरः। स्थाना
नादनुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः। २८। प्रियंवदा। शकुंतलामनुरुध्य। हला चंडि
किंदे ण लब्धि गमणे। शकुंतला। परिवृत्य। सभ्रूभंगं किंणिमित्तं। प्रियंवदा। रुक्खसेचणे
दुवे धारेसि मे एहि दाव अत्ताणं मोचिअ तदो गमिस्ससि। बलादेनां निवर्त्तयति। राजा। प्रि
यंवदां प्रति। भद्रे वृक्षसेचनादेव परिश्रांतां तत्रभवतीं लक्षयेयं यथा ह्यस्याः। स्रस्तांसावति
मात्रलोहिततलौ बाहू घटोत्क्षेपणाद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः। स्रस्तं कु
र्णे शिरीषरोधि वदने घर्माम्भसां जालकं बंधे स्रंसिनि चैकहस्तयमिताः पर्याकुलाः १०
कुंतलाः। २९। तदहमेनामनृणां करोमि। अंगुलीयकं दातुमिच्छति। उभे मुद्दाणमद्दराणु

परस्सवाच्यनुरमालोकयतः। राजा। अलमस्मानन्यथा संभाव्य राज्ञः परिग्रहोयमिति राजपु
रुषं। मामवगच्छथ। संवुत्ता प्रियंवदा नेणाहि हि णाणुहेदि एअ अंगुली वियोगमंगुलीअस्सं अ
ज्जोस्स वएणेण ज्जेव एसा अणरिणा णाम। किं चित्स्वरिहस्साह लासउं दलेमो विदासि अणुकं
पिणा अज्जेण अहवा महाराअेणगानुदालिंतुमं। शकुंतला आत्मगतं। जअदि अत्तणो प
भविस्सं। प्रकाशं। साभिमानं संपदं कादुमं विसज्जिदव्वस्स रुंधिदव्वस्स वा। राजा। शकुंतलां विलो
क्य आत्मगतं। किंनु खलु यथा वयमेतस्यामेवमस्यामप्यतीपैस्यात्। अथवा लब्धावकाशा मे
मनोरथप्रार्थना। कुतः। वाचं न मिश्रयति यद्यपि मे वचोभिः कर्णं ददात्यवहिता मयि भाषमा
णे। कामं न तिष्ठति मदाननसम्मुखी यं भूयिष्ठमन्यविषया न तु दृष्टिरस्याः।३०। नेपथ्ये। भो भोः
तपस्विनः संनिहितास्तपोवने सत्वरक्षायै भवंतु भवंतः प्रत्यासन्नः किल मृगयाविहारी पा

र्थिवो दुष्यंतः। तुरगखुरहतस्तथा हि रेणुर्विटपविषक्तजलार्द्रवल्कलेषु। पततिपरि
णतारुणप्रकाशः शलभसमूह इवाश्रमद्रुमेषु॥३२॥ अपि च। तीव्राघातप्रतिहततरुस्कं
धलग्नैकदंतः पादाकृष्टव्रततिवलयासंगसंजातपाशः॥ मूर्तो विघ्नस्तपस इव नो
भिन्नसारंगयूथो धर्मारण्यं प्रविशति गजः स्यंदनालोकभीतः॥३३॥ सर्वाः कर्णं दत्वा संभ्रां
ता। राजा। अपवार्य। अहो धिगस्मदन्वेषिणः सैनिकास्तपोवनमुपरुंधंति। भवतु प्रतिग
मिष्यामि तावत्। अनसूया। अज्ज इमिणा आकस्सिदसंवुत्तंतेण हि पज्जाउला म्ह। ताअ
णुजाणीहि णो उडजगमणाय। राजा। गच्छंतु भवत्यः। वयमपि आश्रमबाधा यथा न भ ११
वति तथा प्रयतिष्यामहे। सर्वे उत्तिष्ठंति। सख्यो। अज्ज असंभाविदसक्कारं भूओ वि पे
क्खणाणिमित्तं लज्जेमो अज्जं विण्णवेदुं। राजा। मा मैवं दर्शनेनैव भवतीनां सत्कृताः स्म।

शकुंतलासव्याजं विलोक्य सहसखीभ्यां निष्क्रांता॥ राजा मंदौत्सुक्योस्मि नगरगमनं प्रति। या
वदनुयात्रिकान्समेत्य नातिदूरे तपोवनस्य निवेशयेयं न खलु शक्तोस्मि शकुंतलादर्श
नव्यापारादात्मानं निवर्त्तयितुं मम हि संप्रति गच्छति पुरः शरीरं धावति पश्चादसंस्थितं
चेतः। चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य॥ ३२॥ ॥ ॥ इति निष्क्रा
न्ताः सर्वे। प्रथमोंकः॥१॥ ॥१॥ ॥ततः प्रविशति विषण्णो विदूषकः। विदूष
कः। निःश्वस्य द्रहोस्मि एदस्स मगयासीलस्स राएणो वअस्स भावेण णिव्विणो। रण्ण
सिणो अअं मगो अअं सदूलो अअं वराहो त्ति मज्झण्णे वि एत्थ गिम्हे विरलपादवच्छाआसु व
णराइसु आहिंडीयदि अडवीदो अडवी पत्तसंकरकसाआइं विज्झंति कडुआणि गिरिण
ईजलाणि अणियदवेलं असंपल्लसब्बरसं सुल्लमंसभूयिट्ठो आहारो अण्हीअदि तुरग

आणुधावणकेंडिनसंधि णोरत्तं मिमिकामं सयिदबं नपिमहंतेपञ्चसे दासीएगुत्तेहिं
मगुणिकसुद्धकेहिं वणगहणकोलाहलेण पडिबोधिदो ह्मि एम्बकेण दावपीडा णलि
कोमदिनउगंडत्थो परिकोडिओ संतुत्तो इहज्जोब्ब किं न हि अएअह्ने सु उपहीणसुत्त।
त्थमअवदामि आनुसारेण। अस्समपथं अपविदूस्सतापस्सकलम्आसउंदला।
णामममअधम्मदाए ॥. दंसिदासंपदं णअरण्णमणस्सकधंविचित्तणकरेइ अज्जो।
एवंज्जोब्बचित्तयंतस्स अच्छीसु निमीलिदासु पमादासव्वरीकाणई आवणिकिदाचार
परिक्कमं पेरक्खामि। परिक्कमम्म अवलोक्यचाए सोसोवा • णसणेहत्थाहिं मिगयावे
इणीहि परिवुदो वणपुफमालाधारिणीहिं इहज्जोब्ब आगच्छदि व असोमोदुअं १२
गभंगावि अलोमवि अ चिडिस्संजदिए वं णमविसामंलमे अं दंडकाएं अवलंब्य

व्यवस्थितः। ततः प्रविशति। यथा निर्दिष्टवेषः सपरिवारो राजा। राजा। कामं प्रिया न सुलभा मन
स्तु तद्भावदर्शनायासि। अकृतार्थेपि मनसिजे रतिमुभयप्रार्थना कुरुते।। २। स्मितं कृत्वा एवमा
त्माभिप्रायसंभावनया इष्टजनप्रार्थितापि विकल्प्यते। कुतः। स्निग्धं वीक्षितमन्यतोपि नयने।
यत्प्रेषयंत्यानया। यातं यच्च नितंबयोर्गुरुतया मंदं विलासादिव। मागा इत्युपरुद्धया यदपि सा
सासूयमुक्ता सखी सर्वं तत्किल मत्परायणमहो कामी स्वतां पश्यति।। ३। विदूषकः। तथा स्थि
त एव भोवअस्स एमे हत्थपाआ पसारं दिवा अमेत्तकेणजी आव विसंजयदु इमं वो। राजा।
सस्मितं कुतोयं गात्रोपघातः। विदूषकः। सरीखमिव। जदो किल सअं एव अअच्छमाकुलिअ
कुटुंअअस्सकारणं पुच्छेसि। राजा। न खलु अवगच्छामि। विदूषकः। भो जं वेतसो कुंजलीलं
विडंवदि ता किं अत्तणो पहावेण। उदअणदी वेगस्स। राजा। नदी वेगस्तत्र कारणं। विदू। ममावि भवं॥

राजा॥ कथमिव। विदू०। तुए णाम रज्जकज्जाणि उज्झिअ जं दिसे तादिसे अणक्कमणीए देसे वण
13 चरेक कुत्तिणा भविदव्वं जं सच्चं दाव पच्चहं सावदसमुस्सारणाहिं संवाहिद संधिबंधणाणं
गत्ताणं अणीसो संवुत्तो ता पसीद मे विसज्जिदु एक्काहं दाव वीसामम्मि दु। राजा। आत्मगतं।
अयं चैवमाह ममापि काश्यपसुतामनुस्मृत्य मृगयाविक्लवं चेतः न नमयितुमधिज्यमस्मि
शक्तो धनुरिदमाहितसायकं मृगेषु। सह वसतिमुपेत्य यैः प्रियायाः कृत इव मुग्धविलो
कितोपदेशः।२। विदू०। राज्ञो मुखं विलोक्य। किं एस्थ भवं हिअएण चिंतेदि सुन्ने खु मए रुदि
दं। राजा। सस्मितं। किमन्यदनतिक्रमणीयं सुहृद्वाक्यमिति स्थितोस्मि। विदू०। चिरं ज्जीवि १३
विदेन ज्जीव इति निर्गच्छति। राजा। वयस्य तिष्ठ २ सावशेषं मे वचः। विदू०। स्थित्वा। आणवे
दु भवं। राजा। विश्रान्तेन भवता ममास्मिन्न करणीये ऽनायासे सहायेन भवितव्यं। विदू०। किं

मोदकखंडिआए। अग्गंसुम्मा। ही दोजणो। राजा। यत्र कुष्मानिबिड्डं॰। भि(?)दो भावो। कः को
त्र भो। प्रविश्य दौवारिकः एस णं भट्टा आणवेदु भट्टा राजा। रैवतक सेनापतिस्तावदाहू
यतां। दौवारिकः तहेत्ति प्रणम्य सेनापतिना सह प्रविश्य: दौवारिकः। एस आणावअणुक्के
वो भट्टा इदो दिण्णदिट्ठी सम्मुहं ज्जेव चिट्ठदि। उवसप्पदु अज्जो। सेना॰ राजानमवलोक्य
दृष्टदोषाऽपि स्वामिनि मृगया केवलं गुणायैव संवृत्ता। तथा हि देव। अनवरतधनुर्ज्यास्फा
लनक्रूरपूर्वं रविकिरणसहिष्णु स्वेदलेशैरभिन्नं। अपचितमपि गात्रं व्यायतत्वादलक्ष्यं।
गिरिचर इव नागः प्राणसारं बिभर्ति॥४॥ उपगम्य जयतु स्वामिन् गृहीतश्वापदमरण्यं। कि
मन्यदनुष्ठीयतां। राजा। भद्र सेनापते भग्नोत्साहः कृतोऽस्मि मृगयापवादिना माढव्येन से
नापतिः। जनान्तिकं। माढव्य दृढप्रतिबन्धो भव अहं तावत्स्वामिनश्चित्तमनुवर्तिष्ये। प्रका

णो दिव्वप्पलप्पलेपः वैधवेयः ।३११ न्नमञ्ञानिदर्शनमत्रभवानेव मेदः छेदकन्नोदरं। ल
१५ घु भवत्युत्थानयोग्यं वपुः सत्वानामुपलक्ष्यते। विकृतिमच्चित्तं भयक्रोधयोः उत्कर्षः सच
धन्विनो यदिषवः सिध्यंति लक्ष्ये चले मिथ्या हि व्यसनं वदंति मृगयामीदृग्विनोदः कु
तः। यावित्। तत्थ भवं पक्किदिमापत्तो तुमं दाव अग्गउवी दो अडवि माहिंडंतो णरस्सा सिंघा
लो तुवस्स जिस्सरुवस्स मुहे पडिदो होहीस्सरिस। राजा। भद्र सेनापते आश्रमसन्निक
र्षे स्थितास्मः। अतस्ते वचो नाभिनंदामि। अद्य तावत्। गाहंतां महिषा निपानसलि
लं शृंगैर्मुहुस्ताडितं छायाबद्धकदंबकं मृगकुलं रोमंथमभ्यस्यतु। आ विश्रब्धं क्रियता
तां वराहततिभिर्मुस्ताक्षतिः पल्वले विश्रामं लभतामिदं च शिथिलज्याबंधमस्मद्ध १५
नुः। आ सेनापतिः। यथा प्रभविष्णवे रोचते। राजा। तेन हि निवर्त्तय पूर्वगतान्वनग्रा

हिणः। यथा चमे सैनिकास्तपोवनं दूरात्परिहरंति तथा निषेद्धव्यं। पश्य शमप्रधानेषु त
पोधनेषु गूढं हि दाहात्मकमस्ति तेजः। स्पर्शानुकूला इव सूर्यकांतास्तदन्यतेजोभिभवा
द्वमंति। गसेनापतिः। यदाज्ञापयति स्वामी विदूषकः। गछ दासीपुत्र वहक धुत्त ध्वंसदु दे उ
त्साहवुत्तंतो। निष्क्रांतः सेनापतिः। राजा। परिजनमवलोक्य अपनयंतु भवंतो मृगयावेष
रैवतक त्वमपि स्वं नियोगमशून्यं कुरु परिजनः। जं देवो आणवेदि ति निष्क्रांतः। विदू॰। स
हासं। किदं भवदा निम्मक्खिअं ता संपदं एदस्सिं पादवच्छाया विरइदे लदा वितारा कस
णा थे आसणे निसीददु जाव अहं वि सुहासीणो होमि। राजा। गच्छग्रतः। विदू॰। एदु भवं। वि
उभौ परिक्रम्योपविष्टौ। राजा। विदू॰ सर्वः कांतमेवात्मनीयं पश्यति। अहं तु तामेवाश्रमल
ललामभूतां शकुंतलामधिकृत्य ब्रवीमि। विदू॰। आत्मगतं। हेदु ण से अवसरं

दाइस्सं ज कारणं। भोदो व मा व सो कं सा पत्थुणो। आऊ विस्सदि। राजा। सखे। निराकृतनिमे
15 षाभिर्नेत्रपंक्तिभिरुन्मुखैः। नवामिंदुकलां लोकः केन भावेन पश्यति।८। न च सखे परिहार्ये
वस्तुनि पौरवाणां मनः प्रवर्त्तते। सुरयुवतिसंभवं किल मुनेरपत्यं तदुज्झिताधिगतं। अर्क
स्योपरि शिथिलं च्युतमिव नवमालिकाकुसुमं।९। विदू०। विहस्य भो जधा कस्स वि पिंडखज्जू
रेहिं उव्वेजिदस्स चिंतिकाए। अभिलासो भवे तधा इत्थिअरा। अएण परिभाविणो भवदो इयं
पत्थणा। राजा। वयस्य न यावदेतां पश्यसि तावदेवमवादीः। विदू०। तं खु रमणीयं नाम जं
भवदो विम्हअं उप्पादिदि। राजा०। वयस्य किं बहुना। चित्ते निवेश्य परिकल्पितसत्वयोगा
रूपोच्चयेन विधिना मनसा कृता नु। स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे धातुर्विभुत्वम १५
नुचिंत्य वपुश्च तस्याः।१०। विदूषकः। पच्चादेसो दाणीं साहूवदीणं। राजा। इदं मम मनसि

वर्त्तते। अनाघ्रातं पुष्पं किशलयमलूनं कररुहैरनाविद्धं रत्नं मधु नवमनास्वादितरसं।
अखंडं पुण्यानां फलमपि च तद्रूपमनघं न जाने भोक्तारं कमिह समुपस्थास्यति विधिः॥११॥
विदू०। तेण हि लहु संभावेदु णं भवं। एक्कस्स वितवस्सिणो इंगुदी[illegible]ल्लचिक्कणसीसस्स
आरण्णगस्स हत्थे पडिस्सदि। राजा। वयस्य लज्जावती तत्रभवती न च संनिहितो गुरुः।
विदू०। अध भवतो उवरि कीदिसो दिट्ठिराओ स्याः। राजा। वयस्य निसर्गादप्रगल्भस्तपस्वि
अ कन्याजनः तथापिँभिमुखे मयि संहृतमीक्षितं हसितमन्यनिमित्तकथोदयो। विनयवाधित
वृत्तिरतस्तया न विवृतो मदनो न च संवृतः॥१२॥ विदू०। किं रक्कसादि तुमेत्तस्स ज्जेव तव
अंकमारोहदि। राजा। मिथः सखीभ्यां सह प्रस्थाने पुनः शालीनतया सुकुमारतया च तत्र
भवत्या मयि आविष्कृतो भावः॥१३॥ तथाहि। दर्भांकुरेण चरणः क्षत इत्यकाण्डे तन्वी स्थि

ताःकतिचिदेवपदानिगत्वा।आसीद्विवृत्तवदनाचविमोचयंतीशाखासुवल्कलमसक्तम
पिद्रुमाणां।।विदू०।गहीदपाथेयोहोहि।किंदंतस्समवदाणवोवणंविउज्झाणंतवेखोनि
राजा।सखेतपस्विभिःकैश्चित्परिज्ञातोस्मि।चिंतयतावत्केनोपायेनसकृत्आश्रमंवि
शामः।विदू०।तससचिंतेमिमाखुअलीअपरिदेविदेहिमजिस्सदिमवं।चिंतयित्वासानुब
धं।भोः।कोअवरोअववदेसोतुच्छटराआणंनीवारछ्ठाणंभाअंछ्ठाणमुवहरंतु।राजा।
धिक्मूर्खपुण्यभागधेयमेतेरक्षिणोनिर्वपंति।यद्रत्नराशीनपिविहायाभिनंद्यप
स्पा।यदुत्तिष्ठतिविप्रेभ्योन्नृपाणांक्षयितत्फलं।तपःषड्भागमक्षय्यंददत्यारण्य
काहिनः।१४।नेपथ्ये।हंतसिद्धार्थौस्वः।राजाकर्णंदत्वा।अयेधीरःप्रशांतस्वरस्त १६
पस्विभिर्भवितव्यः।प्रविश्यदौवारिकः।जयदुजयदुभट्टा।दुवेइसिकुमारेपडिहार

भूमिं उवट्ठिदे । राजा तेन हि अविलंबं प्रवेशय । दौवारिकः । जं देवो आणवेदि । निःक्रम्य

ऋषिकुमारकाभ्यां प्रविष्टः । इदो इदो भवंतो । ऋषिकुमारौ राजानं विलोक्य प्रथमः । नारद

अहो दीप्तिमतोपि विश्वसनीयतास्य वपुषः । अथवा उपपन्नमेतत् । अस्मिन्नातिभि

न्ने ऋषिभ्यो राजनि । कुतः । अध्याक्रान्ता वसतिरमुनाप्याश्रमे सर्वभोग्ये रक्षायोगाद

यमपि तनः प्रत्यहं संचिनोति । अस्यापि द्यां स्पृशति वशिनश्चारणद्वन्द्वगीतः पुण्यः शब्दो

मुनिरिति मुहुः केवलं राजपूर्वः । द्वितीयः । गौतम अयं स बलभित्सखो दुष्यन्तः । प्रथमः ।

अथ किं । तेन हि नैतच्चित्रं । यदयमुदधिश्यामसीमां धरित्रीमेकः कृत्स्नां नगरपरिघ^

प्रांशुबाहुर्भुनक्ति । आशंसन्ते सुरयुवतयो बद्धवैरा हि दैत्यैरस्याधिज्ये धनुषि विजयः

पौरुहूते च वज्रे । २ । उपक्रम्य विजयस्व राजन् । राजा आसनादुत्थाय अभिवादये भ^

17 गवंतौ। उभौ स्वस्ति भवते फलान्युपहरतः राजा सप्रणामं परिगृह्य आगमनकारणं ज्ञातुमि
च्छामि। उभौ। विदितो भवानाश्रमसदामिहस्थः तेन भवंतं प्रार्थयंते। राजा। किमाज्ञापयंति।
उभौ। तत्रभगवंतः कण्वस्य महर्षेरसान्निध्याद्रक्षांसि नः इष्टिविघ्नमुत्पादयंति तत्कति
पयरात्रं सारथिद्वितीयेन भवता सनाथीक्रियतामाश्रम इति। राजा। अनुगृहीतोस्मि।
विदू। अपवार्य एसा दाणीं दे अणुकूला अब्भत्थाणा। राजा। स्मितं कृत्वा रैवतक मद्व
चनादुच्यतां सारथिः सबाणासनं रथमुपस्थापयेति। दौवा। जं देवो आणवेदि त्ति
निष्क्रांतः। उभौ सहर्षं। अनुकारिणि पूर्वेषां युक्तरूपमिदं त्वयि। आपन्नाभयसत्रेषु
दीक्षिताः खलु पौरवाः। राजा सप्रणामं गच्छतां भगवंतौ अहमप्यनुपदमागत एव। उ ७
भौ विजयस्वेति निष्क्रांतौ। राजा। माढव्य अप्पत्ति शकुंतलादर्शने कुतूहलं। विदू। पढ

मेऽअपरिवाहं आसिदाणींदुरस्सवसवुत्तंतेसपरिवाहं।राजा।माभैषीः।ननुमत्समीपेवा
र्त्तिष्यसे।विदू०।एसोरस्सवसादोरस्सिवदब्बोम्हि।प्रविश्य दौवारिकः।सज्जोरहोमहिणो
विजयपधाणेणवेस्सवदिएसउणेणअराहोदेवीलंआणत्तिहरकरभओआअरदो।एअ
जा।सादरं।किमेवमभिः प्रेषितः।दौवा०।अहइं।राजा।नुनुप्रवेश्यतां।दौवा०।तहइतिनि॰
क्रम्यकरभकेणसहप्रविश्य।एसोभट्टाउवसप्पदु।करभकः।जेदुजेदुभट्टादेवीआए
वेदिअआमिणिचउत्थयदि।अहेपउत्तपारणेमेउववासोभविस्सदितहिंदीहाउणा
अवस्संसंभावइदव्वोत्ति।राजा।इतस्तत्पश्चिकार्य्यंइतोगुरुजनआज्ञाद्वयमप्यनति
क्रमणीयं।किमत्रविधेयं।विदू०।तिसंकुविअअंतरालेचिट्ठ।राजा।सत्समाकुलीभूतो।

18 स्मि। कृत्ययोर्भिन्नदेशत्वाद्द्वैधीभवति मे मनः। पुनः प्रतिहतं शैले स्रोतः स्रोतोवहो यथा। वि-
चिंत्य सखे त्वमेव अंबया पुत्र इव प्रतिगृहीतः। अतो भवानितः प्रतिनिवृत्य तपस्विकार्य्यव्य-
ग्रमनसं मामावेद्य तत्रभवतीनां पुत्रकृत्यमनुष्ठातुमर्हसि। विदू॰। णं खु मं रक्खोभीरु-
अं गणेसि। राजा। सस्मितं कथमेतद्भवति संभाव्यते। विदू॰। जह राआणुएण गंदव्वं तह ग-
च्छामि। राजा। ननु तपोवनोपरोधः परिहरणीय इति सर्वाननुयात्रिकांस्त्वयैव सह प्र-
स्थापयामि। विदू॰। तेण हि युवराओ म्हि संवुत्तो। राजा। आत्मगतं। चपलोयं वटुः कदाचि-
दस्मत्प्रार्थनां अंतःपुरे कथयेत्। भवत्वेनमेवं वक्ष्ये। विदूषकं हस्ते गृहीत्वा प्रकाशं वय- १८
स्य ऋषिगौरवादाश्रमं गच्छामि न खलु तापसकन्यकायां सत्यमेव संकुंतलायां ममाभि-

लाघः।पद्य।क्व वयं क्व परोक्षमन्मथो मृगशावैः सममेधितो जनः।परिहासविजल्पि॰
तं सखे परमार्थेन न गृह्यतां वचः।१।विदू॰।अहं।इति निष्क्रांताः सर्वे द्वितीयोऽङ्कः।२
॥२॥ २ ॥ २॥ २ ॥ २ ॥ततः प्रविशति यजमानशिष्यः।शि॰
अहो महानुभावः पार्थिवो दुष्यंतः प्रविष्ट एवाश्रमं भवति राजनि निरुपद्रवाणि नः
कर्माणि संवृत्तानि भवंति।का कथा बाणसंधाने ज्याशब्देनैव दूरतः।हुंकारेणैव ध॰
नुषः स हि विघ्नानपोहति।१।यावदिमान्वेदिसंस्तरणार्थं दर्भान् ऋत्विग्भ्य उपनया
मि।परिक्रम्यावलोक्य च।आकाशे।प्रियंवदे कस्येदमुशीरानुलेपनं मृणालवंति च
नलिनीपत्राणि नीयंते।किं ब्रवीषि।आतपलंघनाद्बलवदस्वस्था शकुंतला तस्याः
शरीरनिर्वापणायेति तर्हि त्वरितं गम्यतां।सखी सा खलु भगवतः कण्वस्य कुलपते

19

रूढं सूसितं। अहमपितावद्वैतालिकंशांसुद्दकं गोत्तमीहस्ते विसर्जयिष्यामीति निष्क्रां
तः सुद्दविदूषकः॥ ॥ततः प्रविशति कामायमानावस्थो राजा। राजा। ज्ञानेन तपस्ती
वीयं सा वालापरवतीति मे विदितं। अलमस्मित्ततो हृदयं तयापि न दं निवर्त्तयितुं। भ
गवन् कामदेव न ते मय्यनुक्रोशः। कुतस्ते कुसुमायुधस्य शरते द्रापमेतत्। स्मृत्वा।
आः ज्ञातं। अद्यापि नूनं हरकोपवह्निस्त्वयि ज्वलत्यौर्व इवांबुराशौ। त्वमन्यथा मन्म
थ मद्विधानामस्मावशेषः कथमेवमुग्रः।१। अतिशयमपि मकरकेतुर्मनसो रुजमा
वहन्नभिमतो मे मदिरायतनयनां तामधिकृत्य प्रहरतीति मदनवाधां निरूप्य भग
वन् कुसुमायुध त्वयाचं द्रमसा च विप्रलंभनीयाम्यामभिसंधीयंते कामिजनसार्थः। १९
कुतः। तव कुसुमशरत्वं शीतरश्मित्वमिंदोर्द्वयमिदमयथार्थं दृश्यते मद्विधेषु। विसृ

ज्ञतिहिमगर्भैरग्निमिंदुर्मयूखैस्त्वमपि कुसुमबाणान्वज्रसारान्करोषि। भगवन्नेवमुपा
लब्धस्य तेन मां प्रत्यनुक्रोशः। हृष्टेव संकल्पयते स्त्रस्मनंगनीतोसि मया विवृद्धिं। आ
कृष्य चापं स्रवणोपकंठे मय्येव युक्तस्तव बाणमोक्षः।१। परिक्रम्य। क्व नु खलु संस्थिते
कर्मणि सदस्यैरनुज्ञातः श्रमक्लांतमात्मानं विनोदयामि। निश्वस्य किं नु मे प्रियादर्शना
त्ऋते शरणमन्यत् यावदेनामन्विष्यामि। सूर्यमवलोक्य इमामुग्रातपवेलां प्राये
णलतावलयवत्सु मालिनीतीरेषु ससखीजना शकुंतला गमयति तत्रैव तावद्गच्छा
मि। परिक्रम्य स्थितः। निर्वर्ण्य। अनेन हृत्तवीथिकांतरेण तत्रभवतीभिरचिरंगताभिरे
व भवितव्यं। कथमिव। एताः सद्यःप्रचितकुसुमा रिक्तकोशाः करालाः संसर्पद्भिः कथि
तमलिभिर्वंधशोभं दधानाः। उत्कंतानां तनुचनखेभ्यकणहराद्दमाणां छेदोदीर्णं विरम

20 तिलतापस्नवानां न तावत्। श्र्‌ विचार्य संमीलंति न तावद्दंधनकोशास्तथावचितपुष्पाः।
क्षीरस्निग्धाश्च मी दृश्यंते किशलयच्छेदाः।४। संस्पर्शं रूपयित्वा अहो प्रवातसुभगोय
मुद्देशः। शक्यमरविंदसुरभिः कणवाही मालिनीतरंगानां। अंगैरनंगतप्तैरविरलमालिं
गितुं पवनः।५। परिक्रम्यावलोक्य च। अस्मिन्वेतसपरिक्षिप्ते लतामंडपे संनिहितया श
कुंतलया भवितव्यं तथाहि। अभ्युन्नता पुरस्तादवगाढा जघनगौरवात्पश्चात्। द्वारेऽस्य
पांडुसिकते पदपंक्तिर्दृश्यतेभिनवा।६। यावद्विटपांतरेणावलोकयामि। परिक्रम्य तथा
कृत्वा। अये लब्धं नेत्रनिर्वाणं। एषा मे मनोरथप्रियतमा सकुसुमास्तरणं शिला
पट्टमधिशयाना सखीभ्यामन्वास्यते भवतु श्रोष्याम्यासां विस्रंभकथितानि विलोक २०
यन् स्थितः। ततः प्रविशति। यथोक्तव्यापारा सहसखीभ्यां शकुंतला सख्यौ उपवीजयं

तः।उपवीज्य।सख्यौ।हला सउंदले सुहअ्दि दे णलिणीपत्तवादो।शकुं०।किंवी अअंति
मे सहीओ।सख्यौ।विषादं नाटयित्वा परस्परमवलोकयतः।राजा।बलवदस्वस्थशरीराश
कुंतला दृश्यते तत्किमयमातपदोषः स्यात् उत यथा मे मनसि वर्त्तते।विचिंत्य अथवा कृतं
संदेहेन।स्तनन्यस्तोशीरं प्रशिथिलितमृणालैकवलयं प्रियायाः साबाधं किमपि कमनीयं
वपुरिदं।समस्तापः कामं मनसिजनिदाघप्रसरयोर्न तु ग्रीष्मस्यैवं सुभगमपराद्धं युवतिषु
॥।प्रियंवदा जनांतिकं।सहि अणसूये तस्स राएसिणो पढमदंसणादो आरहिअ पज्जुसुआ
विअ सउंदला।किं णु खु से तन्निमित्तो अअं आदंको भवे।अनसूया सहि ममवि ईरिसी आसं
का।हिअस्स होदु पुच्छिस्सं दाव णं।प्रकाशं।सहि पुच्छिदव्वासि किंपि बलिअं खु दे संदावो
।शकुं०।हत्वार्द्धेन पुष्पशय्यामुदस्य।हला किं वत्तुकामासि।अनसू०।हला सउंदले अणब्भ

नराखुवअंमअणागदस्सतुत्तेनस्सकिंदुजादिसीइदिहासणिवंधेसुकामअमाणाणंअ
वत्थासुणीयदिताक्खिसिंदवेस्वामिकहेहिकिंनिमित्तेदेसंदवोवित्थारंखुपरमत्थंअ
जाणियअणारंमोपडिआरस्स।राजा।अनुसूयामप्यनुगतोमदीयस्तर्कः।नहिस्वाभि
प्रायेणमेदर्शने।शाकुं।आत्मगतं।वलिअंखुमेअहिनिवेसोदाणिंपिअसहीणंएस
कणोमिणिवेदितुं।प्रियंवदा।सहिसुअत्थुएषाभणादिकिंअत्तणोआतंकंउवेखसिअणु
दिअहंखुपडिहीयसेअंगेहिंकेवलंलावण्णमयीछाआतुमंणमुंचदि।राजा।अवितथ
माहप्रियंवदा।तथाहि।क्षामक्षामकपोलमाननमुरःकाठिन्यमुक्तस्तनंमध्यःक्लांततरः
प्रकाममवनतावंसौछविःपांडुरा।शोच्याचप्रियदर्शनाचमदनक्लिष्टेयमालक्ष्यतेपत्रा। २२
णामिवशोषणेनमरुतास्पृष्टालतामाधवी।शाकुं।सहिकस्सवाअण्णस्सकहइस्संआ

आसइत्ति कादाणिं वो भविस्सं। उमो। अदो सुणिं वंधो सिणि उज्जणसंविभत्तं हि दुःखं।
ससुवेअणं होहि। राजा। इदाणिं जेन समं दुःखसुखेन अवालाणे यं न वट्टदि मनोगतमाधि
हेतु। इस्सा विरस्स वज्जणोप्पनयासतुह्मामज्झांतरे अवणकातरतां गतो म्हि।।१।। शकुं। सा
हि जदो पभुदि मम मदंसणपहं आअदो सो तवोवणारविदाणएसी इसप्पद्धंतिक्के लज्जंना
इयति। उमो। कहेदुरपिअसही शकुंतला। तदो आरहि अतग्गादेण अहि लासेण एत
दवत्थं लम्भिसं तुत्ता। राजा। सहर्षं श्रुतं श्रोतव्यं। स्मर एव तापहेतुर्निर्वापयिता स एव मे जा
तः। दिवस इवाभ्रश्यामस्तपात्यये जीवलोकस्य।।२।। शकुं। तं जइ दे वो अणुमदं तह वदह ज
ह तस्स राएसिणो अणुकंपणिज्जा होमि। अम्स महा अवस्सं सिंचह मे तिलोदअं। राजा। सं

२२ णय च्छेदि पचने प्रियं। जनांतिकं। अणुसूए इरगअ मम्मण अखु माइ अंचकालहर
णस्स जत्तिं व कुभावा एसा सो ललाम मूदो वारवाणं ताजुत्तसे अहिलासो अहिणं दिदुं
। अन०। तह जह म णासि प्रियं। प्रकाशं। सहि दिट्ठिआ दे अणुरूवो अहिणिवेसो साग
रं वज्जिअ कहिं वा महाणई दुदरइको दाणिं सह आरं अंतरेण अतिमुत्तलदं पल्ल
विदं सहेदि। राजा। किमत्र चित्रं यदि विरणा खो ब्रांकलेखा मनुवर्त्तते। अन० को उण
उवाअ भवे ये अविलंबिणि अऊअं असही एमनोरहं संपादे सप्रियं णि ऊअं ति
चिंतिणिज्जं भवे सिगंघ तिसुअ कैरं। अन०। कहं वि अप्रियं णं सोरा एसी इम स्लिंसि णिदु २२
दि ठि सइ घाहि लासो इमाइ दि अहा इं पजा अरकि सो लखीयदि। राजा। सखा मिस्संमू

तएव्वाम्मि। तथाहि। इदमशिशिरैरंतस्तापाद्विवर्णमणीकृतं निशि निशि भुजन्यस्ता
पांगप्रसारिभिरश्रुभिः। अनभिलुलितज्याघातांकं मुहुर्मणिबंधनात्कनकवलयं
स्रस्तं स्रस्तं मया प्रतिसार्यते। प्रियं। विविंस। हला मअणलेहो से करीअदु इमं देवसे
वावदेसेण सुमणोगोविदं करिअ सेहत्थं पावइस्सं। अनरोचइ मे सउमारोपओ। किंवा
सउंदला भणादि। प्राकुंतला। को णिओओ विचारीयदि। प्रियं। तेण हि अत्तणो उअ्रण
सउबं चिंतेहि दाव किंवि ललिअपदबंधणं। प्राकुं। हला चिंतेमि अहं। अवहीरणाभीरु
अं पुणो वेवइ मे हिअअं। राजा। अयं स ते तिष्ठति संगमोत्सुको विशंकसे भीरु यतोऽव
धीरणां। लभेत वा प्रार्थयिता न वा श्रियं श्रिया दुरापः कथमीप्सितो भवेत्। सख्यौ। अत्त
गुणावमाणिणि को दाणिं सरीरणिव्वाप इति अंसारदिअं जोसिणिं पडंदेण वारेदि॥

23 शाकुंतला। सस्मितं। णिग्गोहदादाणिसि॰ उपविश्य चिंतयति। राजा। स्थाने खलु वि
स्मृतनिमेषेण चक्षुषा प्रियामवलोकयामि। उन्नमितैकभ्रूलतमाननमस्याः प
दानि रचयंत्याः। कंटकितेन प्रथयति मय्यनुरागं कपोलेन। शाकुं॰। हला। चिंति
अं मए गीदवत्थु ण उण सण्णिहिदाणि लेहसाहणाणि। प्रियं। इमस्सिं सुउंद
रस्सु उअमारे णलिणीवत्ते णहेहिं णिक्खित्तवसं करेहि। शाकुं॰। यथोक्तं रूपयित्वा। हला
सुणुह दाणिं संगदत्थं ण वेत्ति॰। उभे॰। अवहिदह्म। शाकुं॰। वाचयति। तुझ ण आणे हि
अअं मम उण कामो दिवा वि रत्तिं म्मि णिक्किव तवे इ बलिअं तुह वुत्तमणोरहाइं अं २३
गाइं। राजा। सहसोपसृत्य। तपति तनुगात्रि मदनस्त्वामनिशं मां पुनर्दहत्येव। ग्ल
पयति यथा शशांकं न तथा हि कुमुद्वती दिवसः। २। सख्यौ। सहर्षं। सग्गदं। अवि

लं विएणो मणोरहस्स । शाकुं । अभुत्थ्या तुमि घ्छान्ति । राजा । अलमलमायासेन । संदष्टकुसु
मशयनान्याशु क्लांतविसभंगसुरभीणि । गुरुपरितापानि न ते गात्राण्युपचारमर्हंति ।
अन । इदो सिलाअलेक्कदेसं अलंकरीअदु वअस्सो । राजा । उपविशति । शाकुंत० । सा
लज्जा तिष्ठति । प्रियं । दुवेणं विवाअणुराओ पच्चक्खो तहवि सहीसिणेहो मं पुणरु
त्तवादिणिं करेदि । राजा । भद्रे नैतत्परिहार्यं विवक्षितं ह्यनुक्तमनुतापं जनयति । प्रियं ।
आपण्णस्स विसअवासिणो जणस्स अत्तिहरेण होदव्वं ति एसो वो धम्मो । राजा । नास्मा
त्परं । प्रियं । तेण हि इयं णो पियसही तुमं उद्दिसिअ इमं अवत्थंतरं भअवदा मअणे
ण आरोविदा । ता अरुहसि अब्भुववत्तीए से जीविदुं । अवलंबिदुं । राजा । साधारणो यं प्रण
यः सर्वथानुगृहीतोस्मि । शाकुं । पियंवदं भवलो क्काहला । किं अंतेउरविरहपज्जुस्सु

२५ असरणा एक्ति णो उवरोहेण। राजा। इदमनन्यपरायणमन्यथा हृदयसंनिहिते हृदयं मम। य
दि समर्थयसे मदिरेक्षणे मदनबाणहतोऽपि हतः पुनः॥ अन॰। वअस्स वऊ बहुवल्लहा राआ
णो सुणिअंति जह णो पिअसही बंधुजणसोअणिज्जा ण होइ तह णिव्वाहेहि। राजा। भद्रे किंब
हुना। परिग्रहबहुत्वेपि द्वे प्रतिष्ठे कुलस्य मे। समुद्रवसना चोर्वी सखी च युवयोरियं॥ उभे
णिव्वुदेह्म। प्रियं॰। सदृष्टिक्षेपं। अणसूए जह एसो इदो दिण्णदिट्ठि उस्सुओ मिअपोअओ
मादरं। अन्नेसदि एहि जोजएम णं प्रस्थिते। शकुं॰। हला असरणह्मि अनंदरा आअच्छदु।
उभे। पऊवीए जो सरणं सो तुह समीवे वट्टदि। इति निष्क्रांते। शकुं। कहं गदेएव्व। राजा। अल-
मलमावेगेन। नन्वयमाराधयिता जनस्तव समीपे वर्त्तते। किं शीतलैः क्लमविनोदिभिरार्द्रवा २८
तं संचारयामि नलिनीदलतालवृंतैः। अंके निधाय करभोरु यथासुखं ते संबाहयामि चर

णाबुतवमत्तामो॥ शाकुं॰। ण मा णेसी एसु अत्ता णं अवराहइस्सं उत्स्यापगं तुमिच्छति। राजा। सुं
दरि अनिर्वाणो दिवसः। इयं च समवस्था उत्सज्य कुसुमशयनं नलिनीदलकल्पितं स्तनावरणं क
थमातपे गमिष्यसि परिबाधापेलवैरंगैः॥ बलादेनां निवर्त्तयति। शाकुं। पोरव रक्ख अविणअं
मअणसंतत्तावि ण हु अत्तणो पहवामि। राजा। भीरु अलं गुरुभयेन। दृष्ट्वा ते विदितधर्म्मा तत्रभ
वान् अत्र दोषं न ग्रहिष्यति। कुलपतिः। अपि च। गांधर्वेण विवाहेन बह्वो राजर्षिकन्यकाः। श्रूयंते
परिणीतास्ताः पितृभिश्चाभिनंदिताः॥ शाकुं॰। मुंच दाव मं भूओ विसहीअणं अणुसिइस्सं। राजा॥
भवतु मोक्ष्यामि। शाकुं॰। कदा। राजा। अपरीक्षत कोमलस्य तावत् कुसुमस्येव नवस्य षट्पदेन।
अधरस्य पिपासता मया ते सदयं सुंदरि गृह्यते रसोऽस्य। मुखमस्या॰। समुन्नमवितुमिच्छति। शा॰
कुं॰। नाटेन परिहरति। नेपथ्ये। चक्कवाकवधूए। आमंतेहि सहअरं उवट्ठिआ रअणी। श्रु॰। ससंभ्र

25 मं। पोरवस्स संसग्गं सै सरीरवुत्तंतोपलंभा अस्स अज्जा गोदमी इदो एव्व। आअच्छदि। दाव०। विउवं दरि
दो॰ होहि०। राजा। तथा त्मानमाव्रियति॥ति। ततः प्रविशति पात्रहस्ता गोतमी सख्यौ च। इदो इदो अ
ज्जा गोदमी। गोतमी। शकुंतलामुपेत्य। जादे अवि॰ लज्जसंदावाइं दे अंगाइं। शकुं। अत्थि मे विसे
सो। गोतमी। इमिणा दब्भोदएण णिराबाधं एव्व दे सरीरं भविस्सदि। शिरसि शकुंतलामभ्युक्ष्यात
च्छेपरिणदो॰ दिअहो। एहि उ॰ डअं। एव्व गच्छम्ह० प्रस्थिता। शकुं०। आत्मगतं। हिअअ अ॰ पढमं॰
एव्व सुहोवणदे मणोरहे। कादरभावं ण मुंचसि। साणुसअं विहडिअस्स दे॰ संदावो संपदं। पदांत
रे स्थित्वा। प्रकाशं। लदावलअ संदावहारअ०। आमंतए० तुमं० भूओवि॰ परिभोआअ। दुःखेन नि
ष्क्रांता शकुंतला सहेतराभिः। राजा। राजस्थानमुपेत्य सनिश्वासं। अहो विघ्नवत्त्य॰ प्रार्थितार्थ २५
सिद्धयः। तथा हि। मुहुरंगुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामं। मुखमंसविवर्त्ति पर

न्मलास्याः। कथमप्युन्मितं न चुंबितं तत्। क्व न खलु संप्रति गच्छामि। अथवा। इहैव प्रियाभु-
क्ते लतावलये मुहूर्त्तं स्थास्यामि। सर्वतो विलोक्य। तस्याः पुष्पमयी शरीरलुलिता शय्या शि-
लायामियं क्लांतो मन्मथलेख एष नलिनीपत्रे नखैरर्पितः। हस्ताद्भ्रष्टमिदं बिसाभरणमि-
त्यासज्यमानेक्षणो निर्गंतुं सहसा न वेतसगृहाच्छक्नोमि शून्यादपि। आकाशे। राजन्। सा-
यंतने सवनकर्मणि संप्रवृत्ते वेदिं हुताशनवतीं परितः प्रयस्ताः। छायाश्चरंति बहुधा भय-
मादधानाः संध्यापयोदकपिशाः पिशिताशनानां। राजा। अयमागच्छामि। इति निष्क्रांता
सर्वे शकुंतलायां तृतीयोंकः। ३ ॥ ३ ॥ २ ॥ ततः प्रविशतः कुसुमावचय-
मभिनयंत्यौ सख्यौ। अनसूया। हला। पियंवदे। जइवि। गंधव्वेण। विवाहविधिणा णिव्वुत्त-
कल्लाणा सउंदला। अणुरूवभत्तुगामिणी संवुत्तेति। णिव्वुदं मे हिअअं। तहवि। एत्तिअं। चिंत

26 णेन्दं। प्रियंवदा। किं मे विअ· अनसूया। अज्जसो· रा एसी इ छिअ परिसमाविअ· रिसिहिं। वि
सज्जिओ· अप्पणो· णअरं· पविसिअ· अंतेउरसमागदो· रोगादं· वुत्तंतं। सुमरेदि वा· ए
वेत्ति·। प्रियंवदा। विसत्था होहि· ण तारिसा आकिदि· दिसेसा·। गुणविरोहिणो· होन्ति· तादो·
दाणिं इमं वुत्तंतं· सुणिअ· ण आणे· किं पडिवज्जिस्सदि त्ति· अनसूया· जह· अहं देखा
मि। तह· तस्स· अणुमदं भवे· प्रियंवदा·। कहं विअ· अनसू· गुणवदे· कस्सआ· पडिवादणि
ज्जेति· अअं· दाव· पढमो संकप्पो· तं जइ· देव्वो· एव्व संपादेदि· णं· अप्पआसेण· किदत्था
गुरुअणो· प्रियंवदा· पुष्पभाजनं विलोक्य· सहि· अवइदाइं· बलिकम्मपज्जत्ताइं कुसुमा
इं। अनसूया। णं· पिअसहीए· सउंदलाए· सोहग्गादेवआ· अज्जोणीआ·। प्रियंवदा। जुज्जइ २६
। तदेव कर्म्मारभेते। नेपथ्ये। अयमहं भो·। अनसूया·। कण्णं दत्वा। सहि आदिहीणं· विअ· णि।

वेदिदं · प्रियंवदाए · उडज · संणिहिदा · सेउंदला · । आत्मगतं । अज्ज उए · हिअए एण · असं-
णिहिदा · अनसूया · होदु अलं · एत्तएहिं · कुसुमेहिं · प्रस्थिते · नेपथ्ये · आः अतिथिपरि-
भाविनि · विचिंतयंती यमनन्यमानसा तपोधनं वेत्ति न मामुपस्थितं । स्मरिष्यति त्वां न
स बोधितोऽपि सन्कथां प्रमत्तः प्रथमं कृतामिवा ॥ प्रियंवदा · हद्धि हद्धि · अप्पिअं · एव्व सं-
वुत्तं · कस्सिं पि पूआरुहे । अवचरद्धा · सुणहिअआ · सउंदला · पुनर्विलोक्य । ण कुज्ज स्सिं-
कस्सिं वि · एसो · दुव्वासो · सुलहकोवो महेसी · तह · सविअ चलस्कुहल्लाए · दुव्वीराए · गइए · प-
डिणिवुत्तो · को अण्णो हुदवहदो दहिदुं पहविस्सदि · अनसूया · गच्छ पादेसु पणमिअ · णि-
वत्तेहि णं · जाव · अग्घोदअं · उवकप्पेमि । प्रियं · । तह इति निष्क्रांता । अनसू · पदांतरे स्खलि-
तं निरूप्य · अम्मो आवेअ · स्खलिदाए गईए · पब्भट्ठं मह · अग्गहत्थादो · पुप्फभाअणं · पुप्फा

वृचयेनिरूप्प·ग्रविस्प।प्रियंवदा।सहि पक्वि दिवक्को·सो·कस्स·ग्रगुणत्रे पडि गिएहेदि·किं
वि·उलं· साणुक्कोसो·किदो·।अनसू·।सम्मितं·न स्कि·वजु·एतदवि कहेहि·प्रियं जदा णिव
त्तिदुं·ण·इच्छदि तदा विल्लविदो मए·भग्रवं·पढमत्ति पसिवग्र·ग्रविलाद·तव प्पहा च
स्स·डु हि दुज्जनस्स ·भग्रवदा·एक्को·ग्रवराहो·मरसिदजो[redacted]त्ति·अनसू·तदो२ प्रियंवदा
तदोमे वग्रणं अस्सहा·भविदुं·णारुहदि·किंदु·ग्र·हि ह्लाणाभरणादंसणेण सावो·णिवि
त्तिसदित्ति·मंतग्रन्तो सग्रं ग्रंतलिहिदो·अनुसूया सकं दाणिं समस्ससिदुं·ग्रत्थि·तेण·रा
एसिणा·संपत्थिदेण·सणाम हेग्रं किदं·ग्रंगुलीग्रंग्रं सुमरणीअंत्ति सग्रं पिणद्धं तस्सिं· २७
साहीणोवाआ·सउंदला भविस्सदि।प्रियंवदा।सहि एहि देवकज्जं दाव·णिवत्तेह्म·इति प
रिक्रामतः प्रियं विलोक्य ग्रगुसूए·पेस्ख·दाव·वामहत्थोपहिदवग्रणा·आलिहिदा·विग्र·

सहि मन्तुगदाए चिंताए अत्ताणं वि · एसा · ण विभावेदि · किं उण · आगंतुअं · अनसू: प्रि
यंवदे ण हु ईदिसो एव्व · तो · मुहे · एसो वुत्तंतो · चिठ्ठदु · रक्खिदव्वा · खु · पकिदिपेलवा · पिअसही ०
प्रियं ० कौ दाणीं · उण्हो दएण · णोमालिअं सिंचेदि · इति निष्क्रांते विष्कंभः ततः प्रविशति
सुप्तोत्थितः शिष्यः। शिष्यः। वेलोपलक्षणार्थमादिष्टोस्मि। तत्रभवता प्रवासादुपावृत्ते
न काश्यपेन। प्रकाशं। निर्गत्य तावदवलोकयामि। कियदवशिष्टं रजन्या इति परिक्रम्या
वलोक्य च। हंत प्रभातं जातं। तथा हि। यात्येकतोस्तशिखरं पतिरोषधीनामाविष्कृतारुण
पुरस्सर एकतोर्कः। तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां लोको नियम्यत इवात्मदशांतरे
षु॥१॥ अपि च। अंतर्हिते शशिनि सैव कुमुद्वती मे दृष्टिं न नंदयति संस्मरणीयशोभा॥

28 इत्थं प्रवासजनितान्यबलाजनस्य दुःखोनिन्नमतिमात्रसु दुःसहानि। राजविस्रपटाद्देपे
ण। अनुसूया। अनु। जहवि णाम विसअपरं मुहुजस्स विजणस्स। एदं ण विदिदं तह वि तेण
राएसिणा सउंदलाए अणज्जं आचरिदं। प्रियंवदा। याव दु पाथ्थितां होमवेलां गुरवे निवे
दयामि निष्क्रांतः। अनुसूया। पडिबुध्धा वि किं करिस्सं। ण मे उइदे सु णिअकज्जेसु हत्थ
पाअं पसरदि। कामो दाणिं सकामो होदु जेण असच्चसंधे जणे सुद्धहिअआ सही
पदं पाविदा। अहवा दुव्वासाः सावो एसो विआरेदि। अण्णहा कहं सो राएरिं सी तारिसाणि २८
मंतिअ एत्तिअस्स कालस्स लेहमित्तं वि ण विसज्जेदि। ता अहिगणं अंगुलीअअं से वि
सज्जेदुणा दुरकसीलेन वस्सिजणे को अभ्भत्थी अदुणं। सही णं विदोसोत्ति वचसि।

दाविए पारेमि· पवासपडिएण तुतस्स· नादकस्सवस्स· कुसस्संत· परिणीतंसउंदलं· णेवदि
डुं। अस्तेदिं· किंकरणिज्जं· अविज्जपत्रियंवदा। प्रियं०। सहर्षं। सहितुवरतुवरसउंदलाएपस्थाण
ण। कोदुक्खंणेवत्तिदुं। अनसूया। सहिकहंएदं। प्रियं०। सुहेणोहि· दाणिं सहसउंदं· पुच्छिदुं
।सउंदला· सख्यासं· गदत्तिं·। अनु०। तदो अप्रियंवदा तदो जाव· एणं लज्जावणदमुहिं। परि
सज्जिअसअंनादकस्सवेण· एवं· अहिणंदिदं· दिट्ठिआ धूमा उलिददिट्ठिणो विजअमा
णस्स· पावअं· एचव्वआ उदीपडिदा वच्छे सुसिस्स· परिदिण्णा। विज्जा· विअ· असोअणिज्जा
संवुत्ता· अज्जाएव्व· इसिपरिरक्खिदं· तुमं भत्तुणो सआसं विसज्जेमि· त्ति· अनु०। अहकेण सू
इदेतादकस्सवस्सवुत्तंतो। प्रियं०। अग्गिसरणं पविट्ठस्स सरीरं विणा छंदोमईए· वाणी
ए·। अनु०। सविस्मयं। कहेहि। प्रियं०। संस्कृतमाश्रित्य। दुष्यंतेनाहितं तेजो दधानां भूतये

29 भुवः। अवेदितनयामग्निगर्भां शमीमिव॥ अनु०। प्रियंवदामाश्लिष्य। सहि पिअं मे। किं दु अज्ज
एव्वं सउन्दला णीअदि त्ति। उक्कंठा साहारणं परितोसं अणुहोमि। प्रियं०। सहि वअं दाव अम्हे^
दाव उक्कंठं विणोदइस्सामो। सा तवस्सिणी णिव्वुदा होदु। अनु०। तेण हि एदस्सिं चूदसाहाव
लंबिदे णालिएरसमुग्गए तण्णिमित्तं एव्व कालंतरक्खमा णिक्खित्ता मए केसरमालिआ। ता इमं
हत्थसंणिहिदं करेहि। जाव अहं पि से मिअलोअणं तित्थमित्तिअं दुव्वाकिसलआणि त्ति
मंगलसमालंभणाणि विरएमि। प्रियं०। तह करेदु। अन०। निष्क्रान्ता। प्रियं०। नाट्येन सुम
नसो गृह्णाति। नेपथ्ये। गोतमी आदिश्यन्तां शार्ङ्गरवमिश्राः शकुन्तलानयनाय। प्रियंवदा
कर्णं दत्त्वा। अणसूए तुवर २ एदे हत्थिणाउरगामिणो इसिओ सद्दाविअंति। प्रविश्य २९
समालंभनहस्ता। अनसूया। सहि एहि गच्छह्म। परिक्रामतः। प्रियंवदा। विलोक्य। एसा।

पुज्जो दअअ ब्बणि जिदा पडि ब्भिदली वा रह त्थाहिः सो त्थि वा अअ णका हिं ताव सी हिं अहि
णंदीअमाणा · सउंदला चिट्ठदि · उवसप्पेम · णं · उपसर्पतः ततः प्रविशति यथोपदिष्टव्या
पारव्या सनस्था शकुंतला । शकुंतला भगति तापसीनामन्यतमा · जादे भत्तुणो · बहुमाणसू
अअं · महादेई · सद्दं लहेहि · द्वितीया · वच्छे वीरप्पसविणी होहि । तती या व च्छे भत्तुणो बहु
मदा होहि । इत्याशिषो दत्वा गौतमी वर्ज्जं निष्क्रांताः । सख्यौ । उपसृत्य । सहि · सुहमज्जणं · दे
होदु · शकुंतला · । साअदं सहीणं । इदो णिसीदह · उभे । मंगलपात्राण्यादाय । उपविश्य
हला सज्जा होहि । जाव मंगल समालंभणं विरएम । शकुंतला । इदं पि बहु मंतव्वं दुल्लहं
दाणिं मे · सहीमंडणं भविस्सदि त्ति · बाष्पं विसृजति उभे · सहि उइदं ण दे · मंगलकाले · रो
इदुं । अश्रूणि प्रमृज्य । नाट्येन प्रसाधयतः । प्रियंवदा · आहरणोइदं · रूवं · अस्सम

२४ नुलदेहिं पसाहणेहिं विप्पआरीअदि॰ प्रविश्य उपायनहस्तावृषिकुमारकौ। उभौ इदमलंकरणमलं
30 क्रियतामत्रभवती। सर्वा विलोक्य विस्मिताः सर्वाः वत्स हारीत इदं कुत एदं। प्रथमः। तातक
श्यपस्य तपः प्रभावात्। गौतमी॰ किं माणसी सिद्धिः द्वितीयः न खलु॰ श्रूयतां तत्रभवता वयमा
ज्ञप्ताः शकुंतलाहेतोर्वनस्पतीभ्यः कुसुमान्याहरतेति। तत इदानीं॰ क्षौमं केनचिदिंदुपांडुत
रुणा मांगल्यमाविष्कृतं निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित्। अन्येभ्यो वन
देवताकरतलैरापर्वभागोत्थितैर्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वंद्विभिः। प्रियं
वदा शकुंतलां विलोक्य। हला॰ इमाए अ॰ब्भुववत्तीए॰ सूइदा दे भत्तुणो गेहे। अणुहोदव्वा रा
अलच्छी। शकुं। व्रीडां निरूपयति। प्रथमः। गोतम एह्येहि अभिषेकोत्तीर्णाय काश्यपाय व ३०
नस्पतिसेवां निरूपयावः। द्वितीयः। तथेति निष्क्रांतो। सख्यौ। अए॰ अणुवभुत्तभूसणो अ

ग्गं जणो · चित्तकस्स परिचुएण अंगेसुदे · आहरणेविणिओअं · करेम्ह । शकुंतला । जाणेदो
णो उत्तणं । उभे नाट्येनालंकुरुतः । ततः प्रविशति स्नानोत्तीर्णः काश्यपः । काश्यपः यास्यत्यद्य शकुं
तलेति हृदयं संस्पृष्टमुत्कंठया कंठः स्तंभितबाष्पवृत्तिकलुषश्चिंताजडं दर्शनं वैक्लव्यं म
मतावदीदृशमिदं स्नेहादरण्यौकसः पीड्यंते गृहिणः कथं न तनयाविश्लेषदुःखैर्नवैः ।५। वै:४
परिक्रामति · सख्यौ · हला सउंदले · अवसिदमंडणासि परिधेहि । संपदं खोमजुअलं । शकुं
तला · उत्थाय परिधत्ते । गोतमी · जादे · एस · दे · आणंदपरिवाहिणा चक्खुणा · परिस्सजंतो
विअ · गुरू · उवट्ठिदो · आआरं · दाव · पडिवज्जे · शकुंतला · सव्रीडं । तादवंदामि । काश्यपः
। वत्से · ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव । सुतं त्वमपि · सम्राजं · सेव · पूरुमिवाप्नुहि · गो
तमी · भअवं वरो · खु एसो · ण आसीसा · काश्यप · वत्से इतः सद्योहुतानग्नीन्प्रदक्षिणीकुरु

ष्वा। सर्वे परिक्रामंति। काश्यपः। रुद्धकंठं दसा आशास्ते॰ अमी वेदिं परितः॰ क्लृप्तधिष्ण्याः समि ३।
द्वंतः। प्रांतसंस्तीर्णदर्भाः। अपघ्नंतो दुरितं हव्यगंधैर्वैतानास्त्वां वह्नयः पावयंतु॥६॥ प्रतिष्ठस्वेदा
नीं। सदृष्टिक्षेपं। क्व ते शार्ङ्गरवमिश्राः। प्रविश्य। शिष्यः। भगवन्नयमस्मि। काश्यपः। भगिन्याः
स्ते मार्गमादेशय। शार्ङ्ग॰। इतो भवति सर्वे परिक्रामंति। काश्यपः। भो भोस्तपोवनतरवः। पातुं न प्र
थमं व्यवस्यति जलं युष्मास्वपीतेषु या नादत्ते प्रियमंडनापि भवतां स्नेहेन या पल्लवं। आद्ये
वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः सेयं याति शकुंतला पतिगृहं सर्वैरनुज्ञायतां॥७॥
कोकिलरवं सूचयित्वा। अनुमतगमना शकुंतला तरुभिरियं वनवासबंधुभिः। परभृतवि
रुतं कलं यथा प्रतिवचनीकृतमेभिरीदृशं॥८॥ आकाशे। रम्यांतरः कमलिनीहरितैः सरोभिः ३२
छायाद्रुमैर्नियमितार्कमयूखतापः। भूयात्कुशेशयरजोमृदुरेणुरस्याः शांतानुकूलपव

नश्च शिवश्च पंथाः ।९। सर्वे सविस्मयमाकर्णयंति । गोतमी · जादे ञादिजणसिणिद्धाहिं अणु
ण्णादगमणासि तवोवणदेवदाहिं पणम भअवदीणं । शकुंतला सप्रणामं परिक्रम्य जन
नांतिकं । हला पिअंवदे अज्जउत्तदंसणुस्सुआए वि अस्समं परिच्चअंतीए दुक्खदुक्खे
ण मे चलणा पुरदो पवट्टंदि । प्रियं० । ण केवलं तवोवणविरहकादरा सही एव्व तुए उवट्ठि
दविउअस्स तवोवणस्स वि दाव · समवत्था दीसइ । उग्गलिअदब्भकवला मिइ ऊं परिच्चत्त
णच्चणा मोराउं सरिअपंडुपत्ता मुअंति अस्सूणि विअ लदाउं । शकुंतला स्मृत्वा । ताद लदाभइणि
अं वणजोसिणिं · दाव आमंतइस्सं · कास्पपः । अवैमि ते तस्यां सोदर्यस्नेहं । इयं तावद्दक्षिणेन ।
शकुं० लतामुपेत्य । वणजोसिणि चूदसंगदा वि मं पच्चालिंग इदोगदाहिं साहावाहाहिं । अज्ज

प्पऊहि दूरं परिवट्टिणी दे ब्भुमविसं काश्यपः। संकल्पितं प्रथममेव मया तवार्थे भर्त्तारमात्मसदृ-
शं सुकृतैर्गता त्वं। चूतेन संश्रितवती नवमालिकेयमस्यामहं त्वयि च संप्रति वीतचिन्तः।१०। इतः।
पंथानं प्रतिपद्यस्व। शाकुं०। सख्यौ प्रति। हला एस दुवेणं वो हत्थे निक्खेवो। उभे। अअं जणो क-
स्स हत्थे समप्पिदो। बाष्पं विहरतः। काश्यपः। अनसूये अलं रुदित्वा ननु भवतीभ्यामेव स्थि-
री कर्त्तव्या शाकुंतला। सर्वे परिक्रामंति। शाकुं०। ताद एसा उडअपेरंतचारिणी गब्भमंथ-
रा मिअवहू जदा अणघप्पसवा होइ तदा मे कंपि पिअणिवेदइत्तअं विसज्जेइस्सह। काश्य-
पः। नेदं विस्मरिष्यामः। शाकुं०। गतिभंगं रूपयित्वा। को णु खु एसो णिवसणे मे सज्जइ। परा- ३२
वर्त्तते। काश्यपः। वत्से। यस्य त्वया व्रणविरोहणमिंगुदीनां तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।

एषा माकमु ष्पिपरिवर्द्धितको जहाति सोयं न पुत्रकृतकः पदवीं मृगस्ते ।११। शकुं० वच्छ किं स
हवासपरिच्चाइणिं मं अणुसरसि । अचिरप्पसूदाए जणणीए विणा विवड्ढिदो एव्व दाणिं पि मए
विरहिदं तुमं तादो चिंतइस्सदि णिवत्तेहि दाव । रुदंती प्रस्थिता । काश्यपः । उत्पक्ष्मणोर्नयन
योरुपरुद्धवृत्तिं वाष्पं कुरु स्थिरतया विरतानुबंधं । अस्मिन्नलक्षितनतोन्नतभूमिभारे
मार्गे पदानि खलु ते विषमीभवंति ।१२। शार्ङ्गरवः उदकांतात्स्निग्धोजनोनुगंतव्य इतिश्रूय
ते । तदिदं सरस्तीरं इह च्छायामाश्रयामः । सर्वे परिक्रम्य स्थिताः । काश्यपः । आत्मगतं । किं
नु खलु तत्रभवतो दुष्यंतस्य युक्तरूपमस्माभिः संदेष्टव्यं । इति चिंतयति । प्रियं । सहिए
सो अत्थि को वि जे तुरा विरहअं तो न ऊसइ किदो पेसवदा वउडपिणिपत्तंतरिदो वाहारि ०

32 ओविनवाहरेइ पियं उज्झिअ मुणालो इत्तए वदि। किंदेइ चकवाओ। शकुंतला। जनंति
कं। हला पिस्वणालिणीपत्तंतरिदं वि सहअरं अदेक्खंती। आदुरा चक्कवाई आरडइ दुक्क
रं कहं करेमित्ति। अन०। सहिमा एवं मंतिअ। एसा वि पिएण विणा गमेइ रअणिं विसाअदी
हं अरं गरुअं पि विरहदुक्खं आसावंधो सहावेदि। काश्यपः। शार्ङ्गरव इति त्वया मद्वचना
त्स राजा शकुंतलां पुरस्कृत्य वक्तव्यः। शार्ङ्गरवः। आज्ञापयतु भगवान्। काश्यपः। अ॰
स्मान्साधु विचिंत्य संयमधनानुच्चैः कुलं चात्मनस्त्वय्यस्याः कथमप्यबांधवकृतां स्नेहप्र
वृत्तिं च तां। सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया भाग्यायत्तमतः परं न खलु तद्वा ३३
च्यं वधूबंधुभिः। १२। शार्ङ्गरवः। गृहीतः संदेशः। काश्यपः। वत्से त्वमिदानीं यासि। वनौकसो

पिसंतो लोकत्तावयं। शार्ङ्ग० न खलु धीमतां कश्चिदविषयो नाम। काश्यपः। सा त्वमितः पतिकु ३२
लं प्राप्य शुश्रूषस्व गुरून्कुरु प्रियसखीवृत्तिं सपत्नीजने भर्तुर्विप्रकृतापि रोषणतया मा स्म प्र
तीपं गमः। भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी यान्त्येवं गृहिणीपदं युवतयो वामाः
कुलस्याधयः। १४। कथं वा गोतमी मन्यते। गोतमी। एत्तिओ वधूजणस्स उवदेसो जादे एदं खु
सव्वं तुमं धारेहि। काश्यपः। वत्से परिष्वजस्व मां सखीजनं च। शकुं०। तात इदो एव्व किं पिअंवदा
मिस्साओ सहीओ णिवत्तिस्सन्ति। काश्यपः। वत्से इमे अपि प्रदेये न युक्तमनयोस्तत्र गन्तुं त्वया सह
गोतमी यास्यति। शकुं०। (पितरमाश्लिष्य) कहं दाणिं तादस्स अंकादो परिब्भट्ठा मलअतरु
म्मूलिआ चंदनलदा विअ देसंतरे जीविअं धारइस्सं। काश्यपः। वत्से किमेवं कातरासि। अ
भिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला। तन

३५ यमचिरस्साचीवा किं अत्तयचपावनं ममविरहंजोन संवत्तेस्सुचं गणाविस्ससि।२५।शा
कुंतला।पितुःपादयोः पतति।काश्यपः।यदिच्छामितेतदस्तु।शाकुं।सख्यौ उवेत्य
हला दुवेवि मं समं एव्व परिस्सजत्ता।सख्यौ।तथा कला।सहि जदि णाम सो राआ पच्चहि
ण्णाणमंथरो भवे।तदो से इमं अत्तणामहेअ अंकिअं अंगुलीअअं दंसे[redacted]हि।शाकुं
तला।इमिणा संदेसेण वो अकंपिदह्मि।उभे।मा भआहि सिणेहो पावसंकी।शार्ङ्गर
वः।जुगांतरमारूढः सविता।त्वरतां भवती।शाकुं।आश्रमाभिमुखी स्थिता।ताद कदा
भुम्हऊं तवोवणं पेक्खिस्सं।काश्यपः।भूत्वा चिराय चतुरंतमहीसपत्नी दौष्यं ३४
तिमप्रतिरथं तनयं निवेश्य।भर्त्रा तदर्पितकुटुंबभरेण सार्धं शांते करिष्यसि पदं
पुनराश्रमेस्मिन्।।२६।गौतमी।जादे परिहीअदि गमणवेला।णिवत्तेहि पिदरं।अहवा

चिरेणा वि पुणो पुणो एसा एत्थं मं तइस्सदि त्ति वत्ते दुमवं। काश्यपः। वत्से उपरुध्यते तपोनुष्ठानं।
शकुं०। भूयः पितरमालिङ्ग्य। तातव च्चरणपीडिदं तादस्स सरीरं। ता मा अदिमेत्तं मम किदे उक्कंवि
दुं। काश्यपः। सनिःश्वासं। शाममेष्यति मम शोकः कथं नु वत्से त्वया रचितपूर्वं। उटजद्वारवि
रूढं नीवारबलिं विलोकयतः॥७॥ गच्छ शिवास्ते पंथानः। संनिष्क्रान्ता शकुंतला सहया
यिनश्च सख्यौ शकुंतलां विलोक्य। हद्धी हद्धी अंतलिहिदा सउंदला वनराईए। काश्यपः। स
निःश्वासं। अनसूये गतवती वां सहधर्मचारिणी निगृह्य शोकमनुगच्छ मां प्रस्थितं। उभे॥
तादसउंदलाविरहिदं सुण्णं विअ तवोवणं कहं पविसामो। काश्यपः। स्नेहप्रवृत्तिरेवं दर्शिनी
सविमर्शं। परिक्रम्य। हंत भोः शकुंतलां पतिकुलं विसृज्य लब्धमिदानीं स्वास्थ्यं कुतः। अर्थो
हि कन्या पारकीय एव तामद्य संप्रेष्य परिग्रहीतुः। जातो ममायं विशदः प्रकामं प्रत्यर्पितन्या

35

सइवांतरात्मा।१८॥ ॥ ॥इतिनिष्क्रान्तास्सर्वेचतुर्थोऽङ्कः॥४॥ ५ ॥ ४॥

ततःप्रविशत्यासनस्थोराजाविदूषकश्चविदूषकःकर्णंदत्वा।भोभोवअस्ससंगीदसालंतरेअवधाणंदेहि।कलविसुद्धाएगीदीएसरसंजोओसुणीअदिजाणेततहोदीहंसवदिआवणपरिअअंकरेदिति।राजा।तूष्णींभवयावदाकर्णयामि।आकाशेगीयते॥अहिणवमधुलोलुवोतुमंतहपरिचुंविअचूअमंजरी।कमलवसइमेत्तणिव्वुदोमअर विस्सरिदोसिणंकहं।राजा।अहोरागपरिवाहिणीगीतिः।विदू।किंदावगीदीएअवगदोअक्खरत्थो।राजा।स्मितंकृत्वा।सकृत्कृतप्रणयोयंजनः।तदस्यादेवीवसुमतीमंतरेणमहदुपालंभंगतोस्मि।सखेमाढव्यमद्वचनादुच्यतांहंसपदिकानिपुणमुपालब्धोस्मीति।विदू।जंभवंआणवेदितिउत्थाय।भोवअस्सगिहीदस्सतयापरकीये

३५

हिंह स्येहिंसिहंड एताडिअमा एगस्स अस्यल्लाए वीददाअस्स नस्थिपदा। लिंमे मो स्वे। राजा। ग-
